नं० १६-९८ त: १८५५-घ
विभिन्नोपनिषद्, विषयकम्,
पत्राणि १६०

Almira 8-3

नं. १६६ न: १८४४

विभिन्नौषिद पत्रि विषयकंम

पत्राणि १६०

Vs. 1798 – 1844

F. 170

Oni hundred Seventy

मेवमनोवैसर्वेलोकेह्ममेटयन्नाम नो
नवेदेम वज्ञेदेश प्रथमःखण्डः भूरग्नम
न्नयेपृथिव्यैस्वाहा २ भुवोन्तवायवेन्ता
रिक्षायस्वाहा स्वरन्तमादित्यायदिवस्वा
हा ३ भूरग्नयेपृथिव्यैस्वाहा भुवर्वायवे
न्तरिक्षायस्वाहा स्वादित्यायदिवेस्वाहा
भूर्भुवःस्वस्त्वेचन्द्रमसेदिग्भ्यःस्वाहा नमो
देवेभ्यःस्वधापितृभ्यो भूर्भुवःस्ववन्नमोम
४ भूरग्नयेपृथिव्यैचमहतेचस्वाहा भुवो
वायवेचान्तरिक्षायचमहतेचस्वाहा स्वा
गादित्यायदिवेचमहतेस्वाहा भूर्भुवःस्वा
चन्द्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेस्वा
हा नमोदेवेभ्यःस्वधापितृभ्यो भूर्भुवःस्व

ब्रह्मो॰
१

ॐ श्रीगणेशाय नमः ॐ ब्रह्मविद्यां प्रव
क्ष्यामि सर्वज्ञानमनुत्तमम् यत्रोत्पत्तिं लयं
चैव ब्रह्मविष्णुमहेश्वरात् समासेन तु समर्थ
स्य विष्णोरद्भुतकर्मणः रहस्यं ब्रह्मविद्याया
ध्रुवाग्निः संप्रचक्ष्यते ओमित्येकाक्षरं ब्रह्म
यदुक्तं ब्रह्मवादिभिः शरीरं तस्य वक्ष्यामि ।
स्थानं कालत्रयं तथा यत्र देवास्त्रयः प्रो
क्ता लोका वेदास्त्रयोग्नयः तिस्रो मात्रार्ध
मात्रा च त्र्यक्षरस्य शिवस्य च ऋग्वेदो गा
र्हपत्यः पृथिवी ब्रह्म एव च अकारस्य श
रीरं तु व्याख्यातं ब्रह्मवादिभिः यजुर्वेदो
ऽन्तरिक्षं च दक्षिणाग्निस्तथैव च विष्णुश्च भ

गवान्नेवउकारः परिकीर्त्तितः सामवेदस्त
याघोष्माहवनीयस्तथैवच ईश्वरः परमोदेवो
मकारः परिकीर्त्तितः सूर्यमंडलमाभाति ह्य
कारः शंखमध्यगः उकारश्चन्द्रसंकाशस्त
स्यमध्येव्यवस्थितः मकारस्त्वग्निसंकाशो
विधूमो विद्युतोपमः तिस्रोमात्रास्तथाज्ञे
याः सोमसूर्याग्नितेजसः शिखा च दीप
संकाशा यस्मिन्नुपरि वर्तते अर्धमात्रास्त
थाज्ञेयाप्रणवस्योपरिस्थिता पद्मसूत्रनि
भा सूक्ष्मा शिखा सा दृश्यते परा सा नाडी सू
र्यसंकाशा सूर्यं भित्वा तथा परम् द्वासप्तति स
हस्राणि सूर्यं भित्वा तु मूर्धनि वरदः सर्वभू

ब्रह्मो ३ १

2

नामेसर्वंव्याप्यावतिष्ठति कोश्यवेदान्तिना
दत्तंयथालीयतेशान्तये ॐकारस्तत्तथा
योज्यःशान्तयेसर्वंसिकृता यस्मिंल्लीय
तेशाश्वतस्त्वंब्रह्मगीयते ध्रुवेहिचिन्तयेद्धा।
लसोमस्तनायकलानेसोमस्तनायकलाते
इत्याथर्ववेदेब्रह्मोपनिषत्समाप्ता तृतीयो
पनिषत् ३ क्षुरिकांसंप्रवक्ष्यामिधार
णांयोगसिद्धये यांप्राप्यनपुनर्जन्मयोगयु
क्तस्यजायते वेदतत्वार्थविहितंयथोक्तं
हिस्वयंभुवा निःशब्देदेशमास्थायतत्रासन
मवस्थितः कूर्मोंगानी संहृत्यमनोहृ।
दिनिरुध्यच मात्राद्वादशयोगेनप्रणवेनश

नैः शनैः सूचयेत्सर्वमात्मानं सर्वद्वाराणि निरुध्य
च ततो मुखं च कटिग्रीवे किंचिदुन्नमय्य स
प्राणान्संधारयेद्योगी नासाभ्यंतरचारिणः ।
भूत्वा ततस्त्यक्तः प्राणाञ्शनैरथ समुत्सृजेत् स्थि
रमात्मा हृदि कृत्वांगुष्ठेन समाहितः हृत्प
लीनं कुर्वीत तन्नेतैवं त्रयस्त्रयः वायोरायमा
नेनात्र नाभिदेशे समाश्रयेत् ततः संचारयेत्प्रा
णान्पूर्णां नाडीं वितत्य ना ततो रक्तोत्पलाभा
से शुक्लाय तने मदनं दहरे पुंडरीके तत्त्ववेदांते
पुनरायते नहिका कंठमायाति तां नाडीं प
रयत्नैः मनसस्तत्र रुद्रस्य हृती हुताशु ।
द्धिनिर्मला पादस्यापि सिरस्थानं रूपनाम के
नयेत् २ मनोच्छारेणनी द्वेन योगमाभिस

हं॰ टि॰ ५२

निमशः इद्रवज्ररतिशोक्तोमर्मजेघातकी।
र्तिनम् तज्ज्ञानवलयोगेनधारणाभिर्निकेत
येन इडामध्येनसंस्थाप्यमर्मप्राणविमोचवे
वनराभ्यासयोगेनछिद्येदनवशोकितः ततः
केटोनवैयोगीमस्तेहनाडिसंचयम् एकोत्तर
नाडिशतंतन्नामामध्येवरास्मृता इडारन्ध्रवा
मेनपिंगलादक्षिणेनच तयोर्मध्येवरस्थानेय
लेवेदमवेदवित् सुषुम्नानपरीलीनाविर
जाब्रह्मरूपिणी व्यासमन्तिमरुस्ताणिप्रति
नाडीषुनेतिले छिद्येतेध्यानयोगेनसुषु।
मेणाकानांभिद्यते योगनिर्मलधारणात्सुरेणा
नलतेजसा छिद्येनाडीशतेधीरःप्रभवादिह
जन्मनि २ जातीष्वसमोयोगीयथ्यावासयेत

वेनिवे ठवेशुमाशुभेमोवेः मनेडीनोवि
भावयत् नक्ष्मविताः श्रपयेनेशुनजेभवि
वर्जिताः नक्मविद्दितविनक्रतिः शाहृद
शमास्थितः निः मेगात्नवयोगतेनिश
पत्नः शातेः शातेः पाशांक्षिनायथाह्रे
मेनिविशकः त्वेमुत्कमेत क्षित्रपाश
लयाजीवः ममारेतनतेनदा यथानिर्वा
णकालेतदीपादश्यालयेशुनेत माणा
णमस्तीत्वेणनमात्रायारेणयागवित वेरा
ग्यापलशूश्नक्षिनानानेनवाश्यते श्रमस्ता
नेममामोतियत्काकामात्मश्रयाने मर्वेशावि
निःशुक्रक्षिनानेननवश्यनेक्षिनानेनवश्य
नेइति श्रीमत्स्यवेदत्तोकोपनिषत् ॥ ॐ

ल॰
चिको॰
४

नमः पराय अष्टपादं शुचिं हंसं त्रिसूत्रमणु
मव्ययम् त्रिवर्त्मानं तेजसोहं सर्वतः पश्यन्न प
श्यति भूतसंमोहने काले भिन्ने तमसि वैख
रे अन्तः पश्यति सत्त्वस्थं निर्गुणं गुणगह्वरे
अशक्यः सोन्यथा द्रष्टुं ध्यायमानः कुमारकैः
विकारजननीं मायामष्टरूपामजां ध्रुवाम्
ध्यायतेध्यासिता तेन तन्यते प्रेरिता पुनः सू
यते पुरुषार्थं च तेनैवाधिष्ठिताः पुराः गौ
रनाद्यन्तवती सा जनित्री भूतभाविनी सि
तासिता च रक्ता च सर्वकामदुघा विभोः पिबन्ती
नामविषयमसाख्याताः कुमारकाः एक
स्तु पिबते देवः स्वच्छन्देन वशानुगाः ध्यानक्रि
याभ्यां भगवान्भुङ्क्ते सौ प्रसभं प्रभुः सर्वसा

पार्वतीदेवीपृच्छमानो मधुरोक्तिभिः पञ्चे
त्यम्भो महात्मने सर्वर्णो पिप्पलाशने उदासी
नेऽक्षवेदे सत्तातकार्यर्थ वेहियत् शंसेतम
नुशोसेति वहूवः शास्त्रकोविदाः॥ व्यानेहा
हृत्मान्त्रिसमेवेतवगीयते मेत्रायलिषदेव्रल
पदक्रमसमन्वितम् पठेतभार्गवालेनदथ
वीणाभृत्सत्तमाः १ ब्रह्मवागीवभ्रानस्वस्के
भोप्यपलितस्तथा प्रेत्रहाग्रोहिनोछिछाः
पठ्यतेभृगुविस्तरे कालःप्राणाश्वभगवाना
न्माऊरूपधपवच शिवोभवश्वरुद्रश्वशर्वश्वा
ऊरुतस्तथा प्रजापतिविराडेवंपर्स्लिःस
लिलमेवच स्मृयतेमंत्रसंघुकेरथंविदि॥

तैर्विभुः तेषु द्विषा कस्मिन्ने केसमविंशतः।
श्यापरे पुरुषं तिर्गुणो मोत्वमभ्यवोलिशिः
तैविड्ःः चतुर्विंशतिमेत्वाकमस्यक्केयक्कद
शैवे श्रेष्ठे नैष्ठे तस्मिन्नेव त्रिधा तत्पंचधा तथा।
बलाद्यं स्थावरान्ते च प्रपंचं तोत्तानवल्लभः तमे
कमेव प्रपश्यन्ति परिशुद्धं विशुद्धिजाः यस्मिन्स
र्वमिदं प्रोतं ब्रह्मस्थावरजंगमं तस्मिन्नेव लयं
यान्ति बुद्बुदाः सागरे यथा यस्मिन्भावाः प्रली
यन्ते लीना स्याव्यक्ततां यतः नश्यन्ते व्यक्ततां
भूयो जायन्ते बुद्बुदा इव नेत्रस्ताधिष्ठिते चैव का
रणात्व जयेद्बुधः एवमन्नपादे वपर्यस्तत्र
नान्यतः यथा वैश्वावयेच्छ्राद्धं ग्रामान्तं नियतव्रत

मृं
लिको·
९५
5

नः अलाग्यमन्नमानेचपितृणांचोपतिष्ठति
ब्राह्मणंलभिष्यानेतयेविद्ब्राह्मणाद्यः ता
लयेयांतितत्रैवलीनाः स्याङ्क्लप्राप्यिनीश्र
ति अथर्ववेदचूलिकोपनिषत् पंचमीप
मुपनिषत् ५ ओंदेवाहवैस्वर्गंलोकमाय
न्तेरुद्रमपृच्छन्कोभवानितिसोब्रवीदहमे
कः प्रथममासीद्वर्त्तामिचभविष्यामिनान्यः
कश्चिन्मत्तोव्यतिरिक्तइति सोन्तरादन्तरम्प्रा
विशद्दिशश्चान्तरम्प्राविशत्सोऽहंनित्यानित्यो
व्यक्ताव्यक्तोब्रह्माब्रह्माहम् प्राञ्चः प्रत्यञ्चो
हंदक्षिणाञ्चउदञ्चोहमधश्चोर्ध्वश्चाहंदिश
श्चप्रतिदिशश्चाहंपुमानपुमान्स्त्रियश्चाहंसा

6

देवा ऊर्ध्वबाहवो रुद्रं स्तुवंति १ यो वै रुद्रः स भ
गवान्यश्च ब्रह्मा तस्मै वै नमो नमः १ यो वै रुद्रः स
भगवान्यश्च विष्णुस्तस्मै वै नमो नमः २ यो वै
रुद्रः स भगवान्यश्च स्कंदस्तस्मै वै नमो नमः ३
यो वै रुद्रः स भगवान्यश्चेंद्रस्तस्मै वै नमो नमः ४
यो वै रुद्रः स भगवान्यश्चाग्निस्तस्मै वै नमो न
मः ५ यो वै रुद्रः स भगवान्यश्च वायुस्तस्मै वै न
मो नमः ६ यो वै रुद्रः स भगवान्यश्च सूर्यस्त
स्मै वै नमो नमः ७ यो वै रुद्रः स भगवान्यश्च सो
मस्तस्मै वै नमो नमः ८ यो वै रुद्रः स भगवा
न्ये चाष्टौ ग्रहास्तस्मै वै नमो नमः ९ यश्चाष्टौ
प्रतिग्रहास्तस्मै वै नमो नमः १० यश्च भूस्त

रुशि॰
प॰
७

7

स्मैतस्मैनमोनमो ११ यस्यभवः १२ यस्यहरः १३
यस्यमहत् १४ यावत्पृथिवी १५ यस्यान्तरिक्षं
१६ यावद्द्यौः १७ यस्यापः १८ यस्यतेजः १९
यस्यकालश्च २० यस्ययमः २१ यस्यमृत्युः २२
यस्यामृते २३ यस्याकाशे २४ यस्यविश्वं २५
यस्यस्थूले २६ यस्यसूक्ष्मे २७ यस्यशुक्ले २८ य
स्यकृष्णे २९ यस्यकृत्स्ने ३० यस्यसत्ये ३१ यस्य
सर्वंतस्मैतस्मैनमोनमो ३२ २ भूस्तेआदिर्मध्यं
भुवस्तेस्वस्तेशीर्षंविश्वरूपोसिब्रह्मैकस्त्वं ।
द्विधात्रिधावृद्धस्त्वंशान्तिस्त्वंपुष्टिस्त्वंहुतम
हुतंदत्तमदत्तंसर्वमसर्वंविश्वमविश्वंकृतमकृ
तंपरमपरंपरायणंचत्वं अपामसोमममृता

अभूमागन्मज्योतिरविदामदेवान् किन्नूनम
स्मान्कृणवदरातिः किमुधूर्तिरमृतमर्त्यस्य
सोमसूर्यपुरस्तात्सूक्ष्मः पुरुषः सर्वजगद्धितं
वाएतदक्षरंप्राजापत्यंसौम्यंसूक्ष्मंपुरुषंग्राह्य
मग्राह्येणभावंभावेनसौम्यंसौम्येनसूक्ष्मंसू
क्ष्मेणवायव्यंवायव्येनग्रसतितस्मैमहाग्रासा
यवैनमोनमः हृदिस्थादेवतासर्वा हृदिप्रा
णाः प्रतिष्ठिताः हृदित्वमसियोनित्यंतिस्रो
मात्राः परस्तुसः तस्योत्तरतः शिरोदक्षिणतः
पादौयउत्तरतः सओंकारः यओंकारः सप्रण
वोयः प्रणवः ससर्वव्यापीयः सर्वव्यापीसोऽन
न्तोयोऽनन्तस्तत्तारंयत्तारंतच्छुक्लंतत्सूक्ष्मंयः

रुद्रो
प.
८
96

न्तत्वमेतन्देहं शृणुते यदेहं शृणुते नमोऽयं ब्रह्मलयं नमोऽयं ब्रह्मलोक
प्रकोऽयमेकः सरुद्रो योरुद्रः सईशानो यईशा
नः सभगवान्महेश्वरः २ अथ कस्मादुच्यते ॐ
कारो यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्राम
यति तस्मादुच्यते ॐकारः अथ कस्मादुच्यते प्र
णवः यस्मादुच्चार्यमाण एव ऋग्यजुःसामा
थर्वाङ्गिरसं ब्रह्म ब्राह्मणेभ्यः प्रणामयति नाम
यति च तस्मादुच्यते प्रणवः अथ कस्मादुच्यते प्रा
णः यस्मादुच्चार्यमाण एव सर्वान्प्राणान्प्रणा
मयति तस्मादुच्यते प्राणः अथ कस्मादुच्यते स
र्वव्यापी यस्मादुच्चार्यमाण एव यथा स्नेहेन पा
लिलपिंडमिव शान्तरूपमोतप्रोतमनुप्राप्तोव्य

तिरिक्षञ्च तस्माडुच्यते सर्वव्यापी अथ कस्मा
डुच्यते नन्तो यस्माडुच्चार्यमाण एव तिर्यगूर्ध्व
मधस्ताच्चास्यान्तो नोपलभ्यते तस्माडुच्यते न
न्तः अथ कस्माडुच्यते तारम यस्माडुच्चार्य
माण एव गर्भजन्मव्याधिजरामरणसंसा
रमहाभयात्तारयति त्रायते तस्माडुच्यते तारं
अथ कस्माडुच्यते शुक्लं यस्माडुच्चार्यमाण एव क्लं
दते क्लामयति तस्माडुच्यते शुक्लं अथ क
स्माडुच्यते सूक्ष्मं यस्माडुच्चार्यमाण एव सू
क्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाण्यंगा
न्यभिमृशति तस्माडुच्यते सूक्ष्मं अथ कस्मा
डुच्यते वैद्युतं यस्माडुच्चार्यमाण एव व्यक्ते म

रुद्रो॰
पं॰
८

9

हतितमसिद्योतयतितस्मादुच्यतेवैद्युतम
अथकस्मादुच्यतेपरंब्रह्म यस्मात्परमप
रंपरायणंचबृहद्बृहत्याबृंहयतितस्मादु
च्यतेपरंब्रह्म अथकस्मादुच्यतेएकोयस्स
र्वान्प्राणान्संभक्षणेनाजःसंसृजति
विसृजतिचतीर्थमेकेव्रजन्तितीर्थमेके
दक्षिणाःप्रत्यंचउदंचः प्रांचोभिव्रजन्त्ये
केतेषांसर्वेषामिहसंगतिःसाकंसए
कोभूतश्चरतिप्रजानांतस्मादेकउच्यते
अथकस्मादुच्यतेरुद्रो यस्मादृषिभिर्ना
न्यैर्भक्तैर्द्रुतमस्यरूपमुपलभ्यते तस्मादुच्य
तेरुद्रः अथकस्मादुच्यतेईशानोयः सर्वा

देवानी पाती ईशानीभिर्जननीभिश्च शक्ति
भिः अभित्वा शूरोननमोदुग्धा इव धेनवः
ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र
तस्थुष इति तस्मादुच्यते ईशानः अथक
स्मादुच्यते भगवान्महेश्वरो यस्माद्भक्तो
ज्ञानेन भजत्यनुगृह्णाति च वाचं संसृज
ति विसृजति च सर्वान्भावान्परित्यज्यात्म
ज्ञानेन योगैश्वर्येण महति महीयते तस्माद
च्यते भगवान्महेश्वरः अथ कस्मादुच्य
ते शिवः यस्मात्सर्वाणि भूतानि शांतेप
श्यिनी यतेतस्मादुच्यते शिवः नदसति
हृश्योक्रम शिवोभूत्वा महासमते ध्यासी

रुद्रो· पं· ८ १०

10

दशावसन्नं शिवः कृत्वा दिशः सर्वाः संयो
निमिह्याम्नदः नेदंतसुद्भवीतमथ एकोदे
वः प्रदिशोनुसर्वाः पूर्वोहजातः सउगर्भेन्त
नः सएवजातः सजनिष्यमाणः प्रत्यंजना
स्तिष्ठतिसर्वतोमुखः एकोरुद्रोनद्वितीया
यतस्थेयइमांलोकानीशतईशनीभिः प्र
त्यंजनास्तिष्ठतिचान्तकालेसंसृज्यविश्वभु
वनानिगोप्ता योयोनियोनिमधितिष्ठति
एकोयेनेदंसर्वंविचरतिसर्वं तमीशानंव
रदंदेवमीड्यंनिचाय्येमांशान्तिमत्यन्तमेति।
योसौक्रोधायावत्समात्स्मात्वनस्मोहित्वाहे
तुजालस्यमूलं बुद्ध्यासंचितंस्थापयित्वातु

रुद्रएकोरुद्रमाहुः शाश्वतेवैपुराणे ईषमूर्जं
नयश्चवोन्नुनामयंतेमस्त्रुपाशान् तदेवैनात्म
न्येतेनार्धचतस्त्रमात्रेणशांतिंसंस्त्रजतिपशुपा
शविमोक्षणे यासाप्रथमामात्राब्रह्मदेवता
रक्तवर्णेनयस्तांध्यायतेनित्यंसगच्छेद्ब्राह्मप
द् यासाद्वितीयामात्राविस्नुदेवताकृष्णाव
र्णेनयस्तांध्यायतेनित्यंसगच्छेद्वैष्णवंपदम्
यासातृतीयामात्राईशानदेवताकपिलव
र्णेनयस्तांध्यायतेसगच्छेदैशानंपदम् या
सार्धचतुर्थीमात्रासर्वदेवताव्यक्तीभूत्वाखंविच
रतिशुद्धस्फटिकसन्निभावर्णेनयस्तांध्याय
तेनित्यंसगच्छेत्पदमनामकम् तदेतदुपासी
तमुनयोवाग्वदंतिनतस्यग्रहणमयंपन्थावि

रुशि॰
पं॰
६
११
11

हित उत्तरेण येन देवा यान्ति येन पितरो येन ऋ
षयः परमपरं परायणं चेति वालाग्रमात्रं हृद
यस्य मध्ये विश्वं देवं जातरूपं वरेण्यं तमात्मस्थं
येऽनुपश्यन्ति धीरास्तेषां शान्तिर्भवति नेतरेषाम्
यस्मिन्क्रोधं यां च तृष्णां क्षमां चाक्षमां हित्वा हे
तुजालस्य मूलम् बुद्ध्या संचितं स्थापयित्वा
तु रुद्रे रुद्रमेकत्वमाहुः रुद्रो हि शाश्वतेन वै
पुराणेनेषमूर्जेन तपसा नियन्ताग्निरिति भ
स्म वायुरिति भस्म जलमिति भस्म स्थलमि
ति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूं
षि यस्माद्व्रतमिदं पाशुपतं यद्भस्मनाङ्गानि सं
स्पृशेत्तस्माद्ब्रह्म तदेतत्पाशुपतं पशुपाशविमो
क्षणाय य [illegible] योऽ[illegible]धीती

रुधआविवेश यइमाविश्वाभुवनानिचाक्लृ
पेतस्मैरुद्रायनमोअस्त्वग्नये योरुद्रोअग्नौ
योरुद्रोअप्स्वंतर्योरुद्रओषधीवीरुधआवि
वेश योरुद्रइमाविश्वाभुवनानिचाक्लृपेत
स्मैरुद्रायनमोनमः योरुद्रोअप्सुयोरुद्रओ
षधीषुयोवनस्पतिषुयेनरुद्रेणजगदूर्ध्वंधा
रितंपृथिवीद्विधात्रिधाधर्त्ताधारितानागा
येंतरिद्वेतस्मैरुद्रायनमोनमः मूर्धानमस्य
संसेव्याप्यर्ध्वदयंवयत् मस्तिष्कादूर्ध्वःप्र
यत्पवमानोशीर्षतः तद्वाअथर्वणःशिरो
देवकोशसमुज्झितः तत्प्राणोअभिरक्ष
तिशिरोअन्नमथोमनः नवदेवादेवजनेत
गामानवोनरिदाणानवभूमइमाः यस्मि

रु॰ श्रे॰ प॰ १२

12

त्रितं सर्वमोतं प्रोतं तस्मादन्येन परं किंचना
स्ति न तस्मात्सर्वं न परं न दास्ति न भूतं न तो भा
व्यं यदासीन सहस्रपादेकमूर्धा व्याप्तं समे तय
वेदमावरीवर्ति भूतम् अक्षरात्संजायते का
लः कालाद्व्यापक उच्यते व्यापको हि भग
वान्रुद्रो भोगायमानो यदा शेते रुद्रः संह
रते प्रजाः उच्छ्वसिते तमो भवति तम
स आपोऽप्स्वङ्गुल्या मथिते मथितं शिशिरे
शिशिरं मथ्यमानं फेनो भवति फेनादण्डं भ
वत्यण्डाद्ब्रह्मा भवति ब्रह्मणो वायुर्वायोरोंका
र ओंकारात्सावित्री सावित्र्या गायत्री गायत्र्या
लोका भवन्ति अर्चयन्ति तपः सत्यं मधु क्षरन्ति
यद्ध्रुवम् एतद्धि परमं तपः आपो ज्योती रसो

रुद्र आविवेश य इमा विश्वा भुवनानि चाक्लृपे
तस्मै रुद्राय नमो अस्त्वग्नये यो रुद्रो अग्नौ यो
रुद्रो अप्स्वन्तर्यो रुद्र ओषधीर्वीरुध आविवेश
यो रुद्र इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्रा
य नमो नमः यो रुद्रो अप्सु यो रुद्र ओषधीषु ।
यो वनस्पतिषु येन रुद्रेण जगदूर्ध्वं धारितं पृ
थिवी द्विधा त्रिधा यस्मै धारिता नागा येन रि
दैन तस्मै रुद्राय नमो नमः स्तुधीनमस्सस्तेत्वा
यहृदयं च यत्र मस्तिष्का हृद्ये: श्रुयमावा
मा नो शीर्षितः न हाय श्रवणाः शिरो देव को
शः समुत्थितः तमा प्राणो अभिरक्षतां शिरो अ
त्रमथो मनः न व देवा देवजना न गामा न त्वा
भिन्नानि न च भूमयः समाः यस्मिन्निदं सर्वमोत

रु॰श्रो॰
पं॰
१३
13

प्रोतेनस्मात्‌ह्मेनपरं किंचनास्ति नतस्मात्प्र
वेनयोनतदस्ति नभूतेनतोभव्योयदासीनसद्
स्त्वपादेकमस्त्रीव्याप्तेसप्रवेदमावर्तीवर्तिभू
ते श्रन्नगात्मेजायतेकालःकालाद्व्यापकउ
च्यते व्यापकोहिभगवान्रुद्रोभगायमानोः
यदाशयत्वेरुद्रस्तदासंहार्यतेप्रजाः उच्छ्
सितेतमोभवतितमसआपोह्यप्स्वंगुल्यामथि
थितेमथितंशिशिरेशिशिरंमथ्यमानंफ
नोभवतिफेनादंडंभवत्यंडाद्ब्रह्माभवति
ब्रह्मणोवायुर्वायोरोंकारऔंकारात्सावि
त्रीसावित्र्यागायत्रीगायत्र्यालोकाभवंति अ
र्चयंतितपःसत्यंमधुक्षरंतियद्ध्रुवम् एतद्धि
परमंतपः आपोज्योतीरसोऽमृतंब्रह्मभूर्भुवः

स्वेभ्यो नमः ॥ य इदमथर्वशिरो ब्राह्मणोधीते
अश्रोत्रियः श्रोत्रियो भवत्यनुपनीत उपनीतो भव
ति सोग्निपूतो भवति स वायुपूतो भवति स सर्व
पूतो भवति स समस्तपूतो भवति स सर्वैर्वेदैर्ज्ञा
तो भवति स सर्वेषु तीर्थेषु स्नातो भवति तेन सर्वैः
क्रतुभिरिष्टं भवति गायत्र्याः षष्टिसहस्रा
णि जप्तानि भवंति इतिहासपुराणानां रुद्रा
णां शतसहस्राणि जप्तानि भवंति प्रणवाना
मयुतं जप्तं भवति आचक्षुषः पंक्तिं पुनाति
आसप्तमात्पुरुषयुगान्पुनातीत्याहाथर्वा
शिरः सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति
द्वितीयं जप्त्वा गाणापत्यमवाप्नोति तृती
यं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्य ॥ १ ॥ इति

अ॰शि॰
पं॰ ६
२५
15

थर्वशिरोपनिषत्समाप्ता षष्ठी यत्तुपनिष
त् ६ पिप्पलादोऽङ्गिराः सनत्कुमारश्चाथ
र्वाणं भगवन्तं पप्रच्छ: किमादौ प्रयुक्तं ध्यानं
ध्यातव्यं किं तद्ध्यानं को वा ध्याता किं च ध्ये
यमित्येभ्योऽथर्वा प्रत्युवाच ओमित्येतदक्ष
रमादौ प्रयुक्तं ध्यानं ध्यातव्यमोमित्येतदक्षा
रस्य पादाश्चत्वारो देवाश्चत्वारो वेदाश्चत्वार
श्चतुष्पादेतदक्षरं परं ब्रह्म पूर्वास्य मात्रा पृ
थिव्यकारः स ऋग्भिरृग्वेदो ब्रह्मा वसवो
गायत्री गार्हपत्यो द्वितीयान्तरिक्षं स उकारः स
यजुर्भिर्यजुर्वेदो विष्णू रुद्रो रुद्रास्त्रिष्टुब्
दक्षिणाग्निः तृतीया द्यौर्मकारः स सामा
भिः सामवेदो विश्वादित्या जगत्याहवनी

योयावसानेस्यचतुर्थ्यर्धमात्रासालोकेल।
ममकारःसोथर्वणैर्मंत्रैरथर्ववेदःसंवर्तको।
ग्निर्मरुतोविराडेकऋषिर्भास्वतीशुभा
प्रथमारक्ताब्राह्मीब्रह्मदेवत्याद्वितीयाशुभा।
शुक्लारौद्रीरुद्रदेवत्यातृतीयाकृष्णाविमतीवि
ष्णुदेवत्याचतुर्थीविद्युन्मतीसर्ववर्णापुरुषदे
वत्यासएषह्योंकारश्चतुष्पादश्चतुःक्षेत्रश्चतुः
शिराःचतुर्थ्यर्धमात्रास्थूलह्रस्वदीर्घप्लुताः
ओं३ओंइतित्रिरुक्तःचतुर्थःशान्तात्माप्लुतप्र
योगेनसमसमोमितिआत्मज्योतिःसकृदावर्त्ते
सएषसर्वात्माप्राणान्सकृदुच्चारितमात्रःसएषह्यू
र्ध्वमुन्नामयतीत्योंकारः१प्रणवःसर्वान्प्राणान्
मयतिनमयतिचैतस्मात्प्राणवश्चतुर्धावस्थि।

ग॰शि॰
पनि:
१५
15

नयतिविद्देवयोर्विदेवस्पतिसन्यन्नामसर्वेभ्यो
दुःखभयेभ्यः संतारयतीतितारणात्तारः सर्वेदे
वा अस्मिन्निविशन्तीतिविष्णुः सर्वान्बृंहयतिब्र
ह्मा हृत्स्वर्वकारणानिसंप्रतिष्ठाप्यध्यानाद्वि
ष्णुः मनसितानेनपरमात्मनिसंस्थाप्यध्येयमी
शानंप्रध्यायेतशान्ता सर्वमिदंप्रयुक्तंब्रह्मविष्णु
रुद्रेन्द्राः संप्रसूयन्ते सर्वाणिचेन्द्रियाणिसहत्वा
भूतानिकारणंसर्वमैश्वर्यमेवतत्रशिवमाकाशा
मध्ये ध्रुवस्य ब्रह्मादिसंस्थस्यरुद्रस्य ईश्वरः शिव
एवच ध्येयाध्येवदेवमः समवः परिपल्यते ता
न्यपिकेनाक्षणमेकमास्थाप्यऋतुशतस्यापिफल
मवाप्नोति कृत्स्नमोंकारगतिंचसर्वध्यानयोग
ध्यानानांशिवएकोध्येयः शिवंकरः सर्वमन्या

यदि तान्येतामधीमहि त्वा गर्भवासान्मुच्यते
गर्भवासान्मुच्यते इति इत्यथर्वशिखायामुपनि
त्समाप्ता समभीशुपनिषत् ७ पंचात्मकं प
ञ्चसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तम् तं
सप्तधातुं त्रिमलं द्वियोनिं चतुर्विधाहारमयं
शरीरे पंचात्मके कस्मात् पृथिव्यापस्तेजोवा
युराकाशमित्यस्मिन्पंचात्मके शरीरे का पृथि
वी का आपः किं तेजः को वायुः किमाकाशं त
त्र यत्कठिनं सा पृथिवी यद्द्रवं ता आपो यदुष्ण
न्तत्तेजो यत्संचरति स वायुः यत्सुषिरं तदाका
शं तत्र पृथिवी धारणे आपः पिंडीकरणे तेजः
प्रकाशने वायुर्व्यूहने आकाशमवकाशप्रदा
नैः पृथक् श्रोत्रे शब्दोपलब्धौ त्वक्स्पर्शे चक्षुः

गर्भो
पनि
२६
16

क्षीरूपजिह्वारसनेनासिकाघ्राणाउपस्थआ
नंदनेध्यानमुत्सर्गेबुद्ध्याबुद्ध्यतिमनसासंक।
ल्पयतिवाचावदति षडाश्रयंकस्मात् मधु।
राम्ललवणतिक्तकटुकषायरसान्विंदयती।
ति षड्जर्षभगान्धारमध्यमपंचमधैवउपा।
निषादश्चेतीष्टानिशब्दसंज्ञाप्रणिधानाद्दशा
विधाभवंति सप्तधातुकंकस्मात् शुक्लोरक्त
कृष्णोधूम्रःपीतःकपिलःपाण्डुरइतियथादे
वदत्तस्यद्रव्यादिविषयाजायंतेपरस्परंसौम्य।
गुणत्वात्षड्विधोरसोरसाच्छोणितंशोणिता।
नान्मांसमांसान्मेदोमेदसःस्नावास्नावोस्थी
न्यस्थिभ्योमज्जामज्जातःशुक्रंशुक्रशोणितसं
योगादावर्त्ततेगर्भोहृदिव्यवस्थानीतिहृदयेंत

गाग्निस्थानेपित्तंपित्तस्थानेवायुर्वायुतोहृदयंप्रा
जापत्यात्क्रमात् २ नदिदंशुक्रंऋतुकालेप्रयोगा
देकरात्रोषितंबुद्बुदमर्धमासाभ्यंतरेपिंडमासा
भ्यंतरेकठिनंमासद्वयेनशिरोग्रीवामासत्रयेण
पादप्रदेशश्चतुर्थेगुल्फजठरकटिप्रदेशाःपंचमे
पृष्ठवंशःषष्ठेमुखनासिकाक्षिश्रोत्राणिसप्तमे
जीवेनसंयुक्तोष्टमेसर्वसंपूर्णःपितुरेतोतिरेका
त्पुरुषोमातुरेतोतिरेकात्स्त्रीउभयोर्बीजतुल्यत्वा
न्नपुंसकंव्याकुलितमनसोंधाःखंजाःकुब्जावा
मनकाभवंति अन्योन्यवायुपरिपीडितशुक्रद्वै।
ध्याद्विधातनुःस्याद्युग्माःप्रपंचात्मकाःसमर्थाः
पंचात्मिकातेजसाबुद्धिःगंधरसादिज्ञानाक्षरा
क्षरमोंकारंचिंतयतीतितदेकाक्षरंज्ञात्वाष्टौप्रकृ

नयः षोडशविकाराः अष्टमासाशितपीतना
डीस्रवगतेन प्राणआप्यायते अथ नवमे मासि सर्व
लक्षणज्ञानसंपूर्णो भवति पूर्वजातीः स्मरति।
स्मरति शुभाशुभं च कर्म विन्दति २ आहाराः विविधाः
भुक्ताः पीता नानाविधाः स्तनाः मृतश्चाहं पुनः
जातो जातश्चाहं पुनर्मृतः नानायोनिसहस्राणि
मयोषितानि यानि वै मातरो विविधा दृष्टाः पित
रः सुहृदस्तथा अवाङ्मुखः पीड्यमानो जन्तु
भिश्च समन्वितः जातश्चाहं मृतश्चैव जन्म जन्म
पुनः पुनः यन्मया परिजनस्यार्थे कृतं कर्म शु
भाशुभम् एकाकी तेन दह्येहं गतास्ते फलभो
गिनः यदि योन्याः प्रमुच्येहं तत्प्रपद्ये महेश्वरम् अशु
भक्षयकारकं फलमुक्तिप्रदायकं यदि योन्याः प्रमु

चेर्हन्तस्तोत्वेयेपामभषसे अशुभदायकास्केप
रेशुक्तिप्रदायकं ततश्चदशाममासि अध्यपोति
द्वारमाणनीयत्र्ञाणापीडमानोमहताडःखेनज्ञा
नमाचसन्वैसवेनवायुवासेस्पर्शेनतदासरति
जन्मसरणानितनकर्मशुभाशुभेविन्दति धर्मार्थे
कस्मादगतयोह्यशुभपन्केलानाग्निदर्शनाग्निः
कोष्टाग्निरिति तत्रकोष्टाग्निनामाग्नितर्पणेनले
ह्यशोछ्यपचतीति दर्शनाग्नीरूपाणिदर्शनेक
रोति ज्ञानाग्निःशुभाशुभस्वकर्मविन्दति गौणि
स्थानानिभवन्ति मुखेश्चाहवनीयः उदरेगार्ह
पत्यो हृदिदक्षिणाग्निःआत्मायजमानो ब्रह्मा
लोभादयः पशवोधृतिर्दीक्षासन्तोषश्चबुद्धीन्द्रि
याणिकर्मेन्द्रियाणिकर्मेन्द्रियाणिपात्राणिगो

गर्भो
पनि
१८

18

णिहड्डीशिरोभिः कपाले केशाद्भ्येभुविलवैदे
ष्टृतः कपाले षोडशपाश्वेदतोष्टपटलानिसा
मोनेरेमभेशतसाशीतिकेसप्तियशेनसनवको
ताश्चशतमप्तिराशतानिपंचमताशतानस्थी
निवर्ह्नवीणशतानिषष्टिस्नायेश्चनतोभिमांगे
कोष्ठेरदपलान्यष्टौद्वादशपलानिह्लाणिन
प्रमाणकफस्यढकश्चकज्जस्यमेदःप्रमाणाद्व
नियनेमूत्रपुरीषममहारपरिमाणेप्रस्पलादेमा
तृणांमामिति ५ अथ [illegible] ोपनिषत् अथ
मोपमुपनिषत् ६ अथ [illegible] मेव ३
दारुस्कोहवेनारायणस्ममीनब्रह्मानेशानोना
पोनानिमोमीनमेघावापृथ्वीनस्वत्रापेनस
र्धःसपकाकीनसपवनस्पथ्यानानःस्पसपयता

स्तोममुच्यते तस्मिन्पुरुषाश्चतुर्दशजायं
न्तेएकाकन्यादशेन्द्रियाणिमनएकादशंते
जोद्वादशोऽहंकारस्त्रयोदशप्राणश्चतुर्दश
आत्मापंचदशीबुद्धिःपंचतन्मात्राणिमहाभू
तानि सपञ्चविंशकःपुरुषस्तत्पुरुषंपुरुषो
निवेश्यनास्यप्रधानसंवत्सराजायन्तेसंवत्स
रादधिजायन्ते अथपुनरेवनारायणःसोऽन्य
त्कामोमनसाध्यायतेतस्यध्यानान्तःस्थस्य
ललाटात्र्यक्षःशूलपाणिःपुरुषोजायतेबिभ्र
च्छ्रियंयशःसत्यंब्रह्मचर्यंतपोवैराग्यंमनऐश्वर्यं
सप्रणवाव्याहृतयऋग्यजुःसामाथर्वांगि
रसःसर्वाणिछन्दांसितान्यंगेआश्रितानि २
अथपुनरेवनारायणःसोऽन्यत्कामोमनसा।

गा॰मे॰
प॰त्रे
२९

19

ध्यायेत नमस्य ध्यानानन्तः स्थस्य वेदोन्नताब्जा
न्हेदोपनना १ मा: प्रतता: आप्तुस्ला स्हेनेजो ।
हिरण्मयमण्डतन ब्रह्माचतुर्भुविनायता
मोध्यायन श्वेताभिमुखो भूरभूरितिव्याहृत्या
नित्यो पेत्र ब्रह्मन्नृक् ऋग्वेदः पश्चिमाभिमुखो भू
त्वा भुवः इति व्याहृति मैत्रेभ ब्रह्मन्तो यजुर्वेदः उ
त्तराभिमुखो भूत्वा स्वरिति व्याहृतिर्भगवान् ब्र
न: सामवेद: दक्षिणाभिमुखो भूत्वा जनइति
गान्हव ब्रह्मन्नाथर्ववेद: सहस्रशीर्षदेव सहस्र
नेत्रं विश्वशम्भुवे विश्वतः परमं नित्यं विश्वना
रायणं हरिं विश्वमेवेदं पुरुषस्तद्विश्वमुपजी
वति ऋषिकवि विश्वं समुद्रे नैव विश्वरू
पिणम पद्मकोशप्रतीकाशं लम्बमाको ।

प्राणस्त्रिभिः हृदयं चाण्ययो मुखे मन्त्रैर्म्मुणीः
क्षताभिक्ष नमस्तस्मै महाग्रातिविक्षिप्ताविवे
श्वेतो मुखे नमस्तस्मै वह्निशिखाबाश्रणीया
योद्यावस्थिता नमस्ते प्राणबोधाय नमस्तस्मै पुरुषः
परमात्माह्यवस्थितः स ब्रह्मा स ईशानः से
न्द्रः परमः स्वराट १ य इमां महोपनिषदं
ब्राह्मणोधीते अश्रोत्रियः श्रोत्रियो भवत्यनुप
नीत उपनीतो भवति सोग्निपूतो भवति स
वायुपूतो भवति स सूर्यपूतो भवति स सो
मपूतो भवति स सत्यपूतो भवति स सर्वपू
तो भवति स सर्वैर्देवैर्ज्ञातो भवति स सर्वैर्वे
दैर्ध्यातो भवति स सर्वेषु तीर्थेषु स्नातो
भवति तेन सर्वैः क्रतुभिरिष्टं भवति गायत्र्या

ग.श्री.
पति
२
२०

षष्टिसहस्राणि जन्मानि भवन्ति । त्रिसहस्रा
ग्रहणानां रुद्राक्षाणां जपात् सहस्राणि जन्मानि
भवन्ति । अग्न्याधानानामयुतं जन्म भवति । अश्व
मेधः पंक्तिग्रहणान्नानासमसमानुरुषड्गुणान्नु
रुषड्गुणान्नु तान्नीत्याह । भगवान्हिरण्यगर्भो
नाभ्यन्तर्मन्त्रेण गच्छन्नमन्त्रेण गच्छतीति । इति
महोपनिषत्समाप्ता नवमोऽपनिषत् ॥ ५
अथ अथ अथस्यपृहषएवमाहिस्थानानि भवन्ति
नाभिहृदयकण्ठभ्रूमध्ये चेति । तत्र ब्रह्माद्
ब्रह्म विभाति । शौनको ह वै महाशालो
ऽङ्गिरसं भगवन्तं पिप्पलादं पप्रच्छ । दिव्ये ब्रह्म
पुरे संप्रतिष्ठिता भवन्ति नाभिहृदयकण्ठ
भ्रूमध्ये चेति । कथं सृजन्ति । कस्यैष महिमा बभू

व योहिश्रीमहिमाबभूव देवानामपगुःसदो।
वानोनियतमनियते हिश्रेबस्तुशेविषजेति
ष्कलेश्रुप्रमत्तविरयत्नस्तोविभातिसतिपस्कृति
मयूकरराजानेमोविकरण्य यथामाद्रिकेण
तन्त्रनमालेविबिद्धिपतितेनापकर्षति यथा
वेणुप्राणेयदायाति मरुत्सुमारुतःप्राणेदे
वतानःनःसर्वानाश्रयःसच्छेपेस्थितानाकाशवत्
यथाविशेनमाश्रियाति सममालयमेवस्व
श्रुष्मात्त्वते यथावैवदेवदत्तोयथाक्षादिनास।
मानोन यन्नेवाभिष्ठाशुतैःश्रुभाश्रुभैर्निलिप्य
ते यथाक्रमात्तोनिष्क्रामत्यानन्त्रपयाति।
नैष्वृवदेवदत्तैःसमस्यानमभियाति वेदप
थपारम्यैतानानत्पयत्तैर्भूयसमेनेसमायगाक्षि।

ब्रह्मो
पनि
२२

२१

न्ति पश्यन्ति जलौकावत् यथा जलौका अग्रम
ग्रं नयत्यात्मानं नयति परं मन्यते एवमेवं स
न्तिस्तन्माग्रं चाभिपद्यते नैष वै ष कपालाष्टकं
मन्यते न मेवस्तनस्तवल [illegible] पञ्च वेदयो
नि येन जानाति शुभाशुभमनिरुक्तमस्माद्देवा
[illegible] गोमीलविगः कर्कटाः शुष्काः
पुरुषः प्राणो हि सा परा परा ब्रह्मात्मा देवता वे
दयति यथा वै वेदं सपर्व ब्रह्म स्थाने [illegible]
ति २ [illegible] चत्वारि स्थानानि भ
वन्ति नाभिर्हृदयं कण्ठो मूर्धेति न [illegible]
द ब्रह्म विभाति जागरिते [illegible] यमि
ति जागरिते ब्रह्मा स्वप्ने विष्णुः [illegible] रुद्रः तु
रीयं परमाक्षरं [illegible] विष्णुः [illegible]

ध: प्राण: स जीव: सोग्निर्नीग्रत: नेत्रोमध्ये
यस्मिं ब्रह्म विभाति स्वयममनस्कमश्राग्रम
पाणिपादं ज्योतिर्वर्जितम् तत्र लोका न लो:
का वेदा न वेदा देवा न देवा यज्ञा न यज्ञ माता
न माता न पिता न पिता स्नुषा न स्नुषा चण्डा:
लो न चण्डाल: पुक्कसो न पुक्कस: श्रमणो न
श्रमण: पशवो न पशवस्तापसो न तापस: स्मे
कमेव परं ब्रह्म विभाति हृदयाकाशे नैढिला
न माकाशेन स्मशिरमाकाशेन हृदया हृदया
काशे यस्मिन्निदं सर्व विभाति यस्मिन्निदं सर्व
वमिदं स्मृतं प्रोतं स विभो: प्रज्ञा: सर्वपा तत्र
न लोका देवा: पितरं शाने प्रतिबुध: सर्वे वि:
दति हृदि स्था देवता: सर्वा हृदि प्राणा: प्रा

ब्रह्मो
पनि
५५
२२

निष्ठिताः हृदि प्राणस्य ज्योतिश्चिदानन्दः स्वयमेव
यत्सहस्तान्तादि चैतन्येति श्रुतिः यज्ञोपवीतं
परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आ-
युष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु
तेजः सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बु-
धः यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् सू-
चनात्सूत्रमित्याहुः सूत्रं नाम परं पदं तत्सूत्रं
विदितं येन स विप्रो वेदपारगः तेन सर्वमिदं प्रो-
तं सूत्रे मणिगणा इव तत्सूत्रं धारयेद्योगी यो-
गवित्तत्त्वदर्शिवान् बहिः सूत्रं त्यजेद्विद्वान्यो-
गमुत्तममास्थितः ब्रह्मभावमयं सूत्रं धार-
येद्यः स चेतनः धारणात्तस्य सूत्रस्य नोच्छिष्टो
नाशुचिर्भवेत् द्वितीयः खण्डः २ सूत्रमन्त

गीतं येषां ज्ञानयज्ञोपवीतिना नैवेसूत्रविदो
लोकेनेच यज्ञोपवीतिनः ज्ञानशिखिनो ज्ञा
नतिष्ठा ज्ञानयज्ञोपवीतिनः ज्ञानमेव परं मेषां
पवित्रं ज्ञानमुत्तमम् अग्नेरिव शिखा नान्या
यस्य ज्ञानमयी शिखा स शिखीत्युच्यते विद्वा
न्नेतरे केशधारिणः कर्मण्यधिकृता ये तु वैदि
के ब्राह्मणादयः तैः सन्धार्यमिदं सूत्रं क्रियाङ्गं त
द्धि वै स्मृतम् शिखा ज्ञानमयी यस्य उपवीतं
च तन्मयम् ब्राह्मण्यं सकलं तस्य इति ब्रह्मवि
दो विदुः इदं यज्ञोपवीतं तु परमं यत्परायणम्
स विद्वान् यज्ञोपवीती स्यात् स यज्ञः स च यज्ञवि
त् एको देवः सर्वभूतेषु गूढः सर्वव्यापी सा
र्वव्यापी सर्वभूतान्तरात्मा सर्वाध्यक्षः सर्वा

23

कालेसमयेविनिर्दिशेत सत्त्वस्यहृदयस्थेन
रियेहृदिसंस्थितम् यदानामश्रुतायावन्मात्रेणस
र्वतेषामात्मनि तेनसत्त्वाख्यानेसर्वतस्मात्त
त्त्वाभिवर्त्तनम् निर्मुक्तव्याख्यानसत्त्वावाक्य
यक्लेशवर्जिता सन्तिनोसर्वभूतानांलोकसत्त्वा
ह्वेकष्टोपार्जितानाम् योनोवाचीनिवर्तन्ते श्रप्राप्य
मनसासह आनन्दमत्त्वोवर्ण्णप्राशानाशृण्वते
वृषः सर्वव्यापिनमात्मानंदेवाःसमाधिविवाद्य
नम आत्मविद्यातपोमूलंतच्छ्रोपानिषत्परा
मृतच्छ्रोपानिषत्परमिति ३ अथयद्वेदच्छ्रो
पोतनयस्यामोदृश्यामोयच्छ्रोपनिषत अथानं
सर्वोपनिषत्सारंसमासानसर्वोत्तमं स्तुत्य
मीयते व्याख्यायमानामोक्षमिव शरीरविनाश

माल
कृति
ह्रा
२४
24

[illegible]

वमोक्षाय स्वाहा अन्तश्चरसि भूतेषु गुहायां
विश्वतोमुखः त्वं यज्ञस्त्वं ब्रह्मा त्वं रुद्रस्त्वं विष्णु
स्त्वं वषट्कारः आपो ज्योती रसोऽमृतं ब्रह्म भूर्भु
वः स्वरों नमः आपः पुनन्तु पृथिवीं पृथ्वी पूता पुना
तु माम् पुनातु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु
माम् यदुच्छिष्टमभोज्यं वा यद्वा दुश्चरितं मम
सर्वं पुनातु मामापोऽसतां च प्रतिग्रहं स्वमापोश
नमस्यमृतोपस्तरणमस्यमृतं प्राणे ब्रह्मास्मा
माशिवाप्यायोसि प्राणाय प्रधानाय स्वाहा व्याना
यस्वाहा समानायस्वाहा उदानायस्वाहेति कनिष्ठ
कयाङ्गुल्याङ्गुष्ठेन च प्राणाञ्जुहोम्यनामिकयापाना
नामध्यमया व्यानं प्रदेशिन्या समानं सर्वाभिरुदा
नं तूष्णीमेव कनिष्ठेन जुहोति ३ आहवनीयमेकां
दक्षिणाग्नेर्वैकां गार्हपत्यमेकां सर्वप्रायश्चित्ते

प्राण्ण
त्रिहो
२४
25

यै २ अथापिपानमस्य स्नानायवैणयामोत्सुपस्र
षुपषुनरूपमस्रषुगुरस्मात्प्राणाग्निर्नयोस्सहीत्वाह
दयमन्यालम्ब्नोपत प्राणाग्निः परमात्मा पंच
वायुःभिराहतः श्रभयमर्वभूतेभ्योनमवेदहैक
दाचनेति विश्वोसिवैश्वानरोविश्वरूपोविश्व
यायार्थते जायमानोविश्वमनुप्राह्नुतयः सर्वा यत्र
वेस्मिविशान्तिमीति महानवायषुरुषोयोगु
शैयप्रवसितः नमोऽहंप्राणिपिवामिसमस्त
स्नानायास्तेनाविनेषपवात्मात्वायनाग्निहो
त्रेहोमीतिसर्वेषामेवस्तेनभवन्त्ययतापा
रिवृतानाजुहोमीहोमस्रतिविशोधरीत्पर्वयो
मीतिवनायोगनयन्नोकिनामपयाः नवस्तपोति
नोमस्त्यमाप्लाकृतिः सहस्त्राणिमाभिः परिहो
तपकाविपृत्वास्वर्धितिष्ठति यस्माउत्कोटशीना

त्रिवृतामवत्नराकृतिराहवनीयो भूत्वा मुखे तिष्ठति
शरीराग्निर्नाम जराप्राणदाहा विरविरक्तस्य
वन्त्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति तत्रया
कोष्ठाग्निर्नामाशितपीतलीढखादितानि सम
‥ यच्चित्वा गार्हपत्यो भूत्वा नाभ्यां तिष्ठति २ अस्या
शरीरयज्ञस्य यूपरशनाशोभितस्य को यजमान
का पत्नी के ऋत्विजः के सदस्याः कानि यज्ञ
पात्राणि कानि हवींषि का वेदिः कान्तर्वेदिः को
द्रोणः कलशः को रथः कः पशुः के दर्भाः कः स्रु
वः का आज्यस्थाली का ग्रावाणो का वाज्यभागौ के
प्रयाजाः के अनुयाजाः के इडाः कः सूक्तवाकः शंयो
वाकः के पत्नीसंयाजाः को यूपः का रशना का इष्ट
यः का दक्षिणा किमवभृथमिति २ अस्य शरीरा

प्राणा
गिहो
२९

26

यूपरशनाशोभितस्यात्मा यजमानो बुद्धिः पत्नी
वेदा महर्त्विजः प्राणो ब्रह्मणस्यपानः प्रति
प्रस्थाता व्यानः प्रस्तोता समानो मैत्रावरुण
उदान उद्गाता अहंकारोऽध्वर्युर्होता विनशरीरं वे
दिर्नासिकोत्तरवेदिर्मूर्धा द्रोणकलशः दक्षिण
हस्तः स्रुवः सव्यहस्त आज्यस्थाली श्रोत्रे आघारौ
चक्षुषी आज्यभागौ ग्रीवा धारापोता तन्मात्रा
णि महदस्तामदा भूतानि प्रयाजा नुयाजा जिह्वा
दन्तोष्ठौ स्वाहाकारः तालुः शंयोर्वाकः स्मृतिर्द
या क्षान्तिरहिंसा पत्नीसंयाजा ओंकारो यूपः आ
शा रशना मनो रथः कामः पशुः केशा दर्भा बुद्धी
न्द्रियाणि हवींष्यहिंसा इष्टयस्त्यागो दक्षिणा अ
वभृथं मरणं सर्वा ह्यस्मिन्देवताः शरीरेऽधिसमा

हिनाः वा रा ला म्रो मृतो वा पीटे श्रद्धया यः पठेत् पा
केन न त्मना तन्त्र मौ स्वं च प्राप्नुयादिति ध्या
[illegible] प्रकादशी उपनिष
त् ॥ ॐ ॐ ॐ मित्येतदक्षरमिदं सर्वं तस्योपव्या
ख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रि
कालातीतं तदप्योंकार एव सर्वं ह्येतद्ब्रह्मायमा
त्मा ब्रह्म सोयमात्मा चतुष्पात् जागरितस्थानो
बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभु
ग्वैश्वानरः प्रथमः पादः स्वप्नस्थानोन्तःप्रज्ञः स
प्ताङ्गः एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो
हिरण्यगर्भो द्वितीयः पादः यत्र सुप्तो न कंचन का
मं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषु
प्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यान

माण्डू
के०
२

27

न्दभुक्चेतोमुखः प्राज्ञस्तृतीयपादः ५ एष सर्वेश्व
र एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभ
वाप्ययौ हि भूतानाम् ६ अत्रैते श्लोका भवन्ति बहिःप्र
ज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः घनप्रज्ञस्तथा प्रा
ज्ञ एक एव त्रिधा स्मृतः १ दक्षिणाक्षिमुखे वि
श्वो मनस्यन्तस्तु तैजसः आकाशे च हृ
दि प्राज्ञस्त्रिधा देहे व्यवस्थितः २ विश्वो हि स्थू
लभुङ्नित्यं तैजसः प्रविविक्तभुक् आनन्दभुक्तथा
प्राज्ञस्त्रिधा भोगं निबोधत ३ स्थूलं तर्पयते वि
श्वं प्रविविक्तं तु तैजसम् आनन्दश्च तथा प्राज्ञं त्रिधा तृ
प्तिं निबोधत ४ त्रिषु धामसु यद्भोज्यं भोक्ता यश्च
प्रकीर्तितः वेदैतदुभयं यस्तु स भुञ्जानो न लिप्य
ते ५ प्रभवः सर्वभावानां सतामिति विनिश्चयः

सर्वं जनयति प्राणश्चेतोंशून्पुरुषः पृथक ६
विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः स्व
प्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ७ इच्छा
मात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिता कालात्प्र
सूतिं भूतानां मन्यन्ते कालचिन्तकाः ८ भोगार्थं
सृष्टिरित्यन्ये क्रीडार्थमिति चापरे देवस्यैष स्वभा
वोयमाप्तकामस्य का स्पृहा ९ नबहिःप्रज्ञं ना
न्तःप्रज्ञं नोभयतःप्रज्ञं प्रज्ञानघनं नप्रज्ञं ना
प्रज्ञायनमानन्दघनं प्रज्ञामदृष्टमव्यवहार्यमग्रा
ह्यमलक्षणमलिंगमचिन्त्यमव्यपदेश्यमेकात्म
प्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्य
न्ते स आत्मा विज्ञेयः १ अत्रैते श्लोका भवन्ति प्र
ज्ञानां सुप्तानैः स्थिरचरनिकरव्यापिभिर्वो।

पलोकान्स्वस्वाभोगान्स्थाविशन्स्वनशिपि।
षेणज्ञासितान्कामजन्मान् पीतासर्वोत्कृषे
षान्स्वातिमध्यश्च मयथामोहयन्मोमायया मा
लिन्नरीयपामस्तनमजेब्रह्म यतेन्तेतोऽस्मि यो
विश्वात्माविवियपथयान्स्वाभोगान्स्थाविशा।
नश्वास्थानान्स्वमतिविभवाज्ञेपातिषासेन हृस्म
न सर्वानन्ताश्चनापिशीनः स्वात्मनि स्थापयन्ता
ह्निमसर्वोत्कृष्टीषान्निगतगुणगणः पात्वमा
नन्त्वरीयःकार्यकारणवृन्दानाविषातविश्वात
मेसौ प्राहःकारणवृन्दस्त्रीनन्तर्यनामिज्ञतः
नात्मानंनपराश्वनसत्त्वापिनान्तनम प्राहः
किंचनमेविनिवेतस्वदेहकाष्ठा निवृत्तेमर्दे
दुःखोनामीश्वानःप्रशुच्यायःश्रीइतिःसर्वभावा

नौतुर्येनसिध्यतः ॥ द्वैतस्याग्रहणंतुल्यमु
भयोः प्राज्ञतुर्ययोः बीजनिद्रायुतः प्राज्ञः साच
तुर्येनविद्यते स्वप्ननिद्रायुतावाद्यौप्राज्ञस्त्वस्व
प्ननिद्रया ननिद्रांनैवचस्वप्नंतुर्येपश्यन्तिनिश्चि
ताः अन्यथागृह्णतः स्वप्नोनिद्रातत्त्वमजानतः वि
पर्यासेतयोः क्षीणेतुरीयंपदमश्नुते अनादि
मायया सुप्तोयदाजीवः प्रबुध्यते अजमनिद्रम
स्वप्नमद्वैतंबुध्यतेतदा प्रपञ्चोयदिविद्येतनिवर्ते
तनसंशयः मायामात्रमिदंद्वैतमद्वैतंपरमार्थत
विकल्पोविनिवर्तेतकल्पितोयदिकेनचित्उप
देशादयंवादोज्ञातेद्वैतंनविद्यते सोयमात्मा
ध्यक्षरमोंकारोधिमात्रंपादामात्रापादा अका
रउकारोमकारइति जागरितस्थानोवैश्वान

मात्र
का
२५

29

रोकारः प्रथममात्राप्तेरादिमत्वाद्वाप्नोति
ह वै सर्वान्कामानादिश्च भवति य एवं वेद स्वप्न
स्थानस्तैजस उकारो द्वितीया मात्रोत्क
र्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समान
श्च नास्याब्रह्मवित्कुले भवति य एवं वेद सुषुप्तस्था
नः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनो
ति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद अत्रै
ते श्लोका भवन्ति विश्वस्यात्वविवक्षायामादिसा
मान्यमुत्कटम् मात्रासम्प्रतिपत्तौ स्यादाप्तिसा
मान्यमेव च तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फु
टम् मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथावि
धम् मकारभावे प्राज्ञस्य मानसामान्यमुत्कट
म् मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च त्रिषु

धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः स पूज्यः सर्व
भूतानां वन्द्यश्चैव महामुनिः अकारो नयते विश्व
मुकारश्चापि तैजसं मकारश्च पुनः प्राज्ञं नामा
त्रे विद्यते गतिः ६ अमात्रश्चतुर्थोऽव्यवहार्यः प्रपं
चोपशमः शिवोऽद्वैत ओंकार आत्मैव संविशत्या
त्मनात्मानं य एवं वेद अत्रैते श्लोका भवन्ति ओंका
रं पादशो विद्यात्पादा मात्रा न संशयः ओंकारं पाद
शो ज्ञात्वा न किंचिदपि चिन्तयेत् युञ्जीत प्रणवे
चेतः प्रणवो ब्रह्म निर्भयं प्रणवे नित्ययुक्तस्य न
भयं विद्यते क्वचित् प्रणवो ह्यपरं ब्रह्म प्रणवश्च
परः स्मृतः अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्य
यः सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च एवं
हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् प्रणवं हीश्व

वैत
थ्योप
ः

ंविद्यात्सर्वस्य हृदये स्थितं सर्वव्यापिनमोंकारं
मत्वा धीरो न शोचति अमात्रोऽनन्तमात्रश्च द्वैतस्यो-
पशमः शिवः ओंकारो विदितो येन स मुनिर्नेतरो ज-
नाः स मुनिर्नेतरो जनः॥ इति गनेतिमाण्डूक्योपनिषत्स
मासा आगमशास्त्रे गौडपादीयम् ११ इति प्रथमप्रकरणम्॥
वैतथ्यं सर्वभूतानां स्वप्न आहुर्मनीषिणः अन्तःस्था-
नात्तु भेदानां संवृतत्वेन हेतुना ...... कालस्य
गत्वा देशान्तरं पश्यति प्रतिबुद्धश्च वै सर्वस्तस्मिन्दे-
शे न विद्यते अभावश्च रथादीनां श्रूयते न्यायपूर्व-
कम् वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशि-
तम् २ अन्तःस्थानात्तु भेदानां तथा जागरिते स्मृ-
तम् यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते स्वप्न-
जागरितस्थाने ह्येकमाहुर्मनीषिणः भेदानां॥

30

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

वैत
थ्याप्र
३१

31

त्मानमात्मोदेवस्स्वमायया सएवबुध्यतेभे
दानितिवेदान्तनिश्चयः विकरोत्यपरान्भा
वानन्तश्चित्तेव्यवस्थितान् नियतांश्चबहि
श्चित्तएवंकल्पयतेप्रभुः चित्तकालाहियेन्त
स्तुद्वयकालाश्चयेबहिः कल्पिताएवते
सर्वेविशेषस्त्विन्द्रियान्तरो १ जीवंकल्पय
तेपूर्वंततोभावान्पृथग्विधान् बाह्याना
ध्यात्मिकांश्चैवयथाविद्यस्तथास्मृतिः अ
निश्चितायथारज्जु

निश्चितायांयथार विकल्पोविनिवर्तते
रज्जुरेवनिचाद्वैतंतद्वदात्माविनिश्चितः अ
णादिभिरन्तेस्तुभावैरेवविकल्पितःसा

यैषा तस्य देवस्य यया संमोहितः स्वयम् ॥
प्राण इति प्राणविदो भूतानीति च तद्विदः गु
णा इति गुणविदस्तत्त्वानीति च तद्विदः पा
दा इति पादविदो विषया इति च तद्विदः वेदा
इति वेदविदो यज्ञा इति च तद्विदः भोक्तेति च भो
क्तृविदो भोज्यमिति च तद्विदः सूक्ष्म इ
ति सूक्ष्मविदः स्थूल इति च तद्विदः मूर्त इति
मूर्तविदोऽमूर्त इति तद्विदः काल इति का
लविदो दिश इति च तद्विदः वाद इति वादविदे
भुवनानीति च तद्विदः चित्तमिति चित्तविदो
धर्माधर्मौ च तद्विदः पंचविंशक इत्येके षड्विंश
इति चापरे लोकालोकविदः प्राहुराश्रमा इ
ति च तद्विदः स्त्रीपुंनपुंसकं लिंगपरापरम

वैत
थोप
३२
32

ध्यायेऽथ हृष्टिरितिस्तष्टुविदोलयंतिखता
द्विदः स्थितिरिति स्थितिविदः सर्वैर्वेदैस्ता
वेद्यो यो भावेदः श्रेयश्च एतेभ्यो वेस्त्वं पश्यं
ति न भावो विश्वभूत्वासीत् स्रष्टुः सम्बन्धितत्तम
पतेऽथ स्त्रष्टा भावेः स्वेथ्यो वेदितव्यं इति नः एवं
यो वेद तत्त्वेन कल्पयन्नेसो विशोकितः स्वस
माये यथा हृष्टा गन्धर्वनगरं यथा तथा विश्व
मिदं दृष्टं वेदान्तेषु विचक्षणैः नमस्ते प्रत
म दृष्ट्वा स्वभु इयमात्मा नाशकायं स्वतोऽथी
न नाशोते स्मभाव नम नित्ये योन चान्यात्
ने च देन च स्माय कः न च स्वं वेव स्वकस्य
घापरमार्थता भावे समाधि वायमनसेन वा
कल्पतः भावा ग्राह्य इयं ते वत स्मात् इयमा

ष्ठितो वा ॥ नात्मभावेन नादेन न सेनापि कश्चेवन
न दृश्यः कास्तस्थ्यकिं विदितेन नमा विद्यो विद्वः वी
न गाभयकाय मुनिभि वेदपारगैः निर्विका
रो व्ययद्रष्टः प्रपञ्चोपशमो द्वयः तस्मादेवं
विदित्वैनं मेडैः नैया न यो तस्मैति मु ग्रुडेतमम
नुगच्छनिरुवलोकमात्रेवेत निस्तनिर्वितेम
त्काराणिः सवणाकाशवत्वं वलावलति को
न श्वयातिर्या हीश्विकोभवेत् नन्नमान्यात्मि
काद्दष्टा तस्मै दृष्टा न वास्यतो नैवी भूतलला
मलनादश्च्युतो भवेत् तन्नादप्रच्युतो भवेत् ।
इति श्रीकण्ठध्यानदीपिकोपनिषत्कारणम् अथ दशो
पनिषत् ५ उपासनाभ्निनो यमो लानब्रह्म
शिवनिते प्राग्गस्तेरज्ञेमवेतेनामो क्षपणः स्व

33

नः अतो वक्ष्याम्यकार्पण्यमजातिसमतां तथा
तथा न जायते किंचिज्जायमानं समन्ततः आ
त्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः घ
टादिवच्च संघातैर्जातावेतन्निदर्शनम् घटादि
षु प्रलीनेषु घटाकाशादयो यथा आकाशे
संप्रलीयन्ते तद्वज्जीवा इहात्मनि यथैकस्मि
न्घटाकाशे रजोधूमादिभिर्युते न सर्वे संप्रयुज्य
न्ते तद्वज्जीवाः सुखादिभिः रूपकार्यसमाख्या
श्च भिद्यन्ते तत्र तत्र वै आकाशस्य न भेदोऽस्ति
तद्वज्जीवेषु निर्णयः नाकाशस्य घटाकाशो
विकारावयवौ यथा नैवात्मनः सदा जीवो वि
कारावयवौ तथा यथा भवति बालानां गगनं
मलिनं मलैः मरणे संभवे चैव गत्यागमनयोर

पि स्थितो सर्वशरीरेष्वाकाशेनाविलन्नलाः
संज्ञाताः स एव सर्वे ब्रह्मात्ममाया विवर्जिताः ।
आयिकेच सर्वे मात्मेवानोपपत्तिर्हि विद्यते २१
मात्येहि याकाशो लिङ्गीयकेः तथामात्मा ।
परोजीवः स्वयमाप्रकीर्तितः उपाधेर्या
भिन्नत्वेन परब्रह्मप्रकाशितम् सौष्ठव्यात्र
रैविष्णव्याकाशः प्रकाशितम् जीवात्मनात्व
स्वकर्मभेदतत्रशक्यते नानात्वेनिमितेयस्त्वनेद
वहितमेव समम जीवात्मनः स्पष्टमेव यन्याउत्र
तेः प्रकीर्तितम् भविष्यहृ सौगोनतत्त्वक्षोदे
हिनप्रजायते मस्त्रोहाविष्कृतिगेस्त्वदृष्टयो ।
वहितासथा उपायः सावतारायनात्विभेदः
कश्चन आश्रमाहिविधाहीनमध्यमोत्कृष्टा ।

वैत
प्रया०
३५
35

इष्टयः। उपमानोपदिष्टेयं तदर्थमनुकम्पया।
स्वसिद्धान्तव्यवस्थानं दृष्टेति नो नित्यत्वता हि स्वा
परस्या विरहश्चान्ते नैयायिकविरहश्चेत् अपि तत्पा
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नं युक्तियुक्तं च यत्तद्भवति नेतरत् नेह नानेति चाम्ना-
यादिन्द्रो मायाभिरित्यपि अजायमानो बहु-
धा मायया जायते तु सः सम्भूतेरपवादाच्च सम्भ-
वः प्रतिषिध्यते २ स एष नेति नेतीति व्याख्यातं
निह्नुते यतः सर्वमग्राह्यभावेन हेतुनाजं प्रकाश-
ते सतो हि मायया जन्म युज्यते न तु तत्त्वतः तत्त्व-
तो जायते यस्य जातं तस्य हि जायते असतो मा-
यया जन्म तत्त्वतो नैव युज्यते वन्ध्यापुत्रो न तत्त्वेन
मायया वापि जायते यथा स्वप्ने द्वयाभासं स्पन्द-
ते मायया मनः ४ तथा जाग्रद्द्वयाभासं मनः स्वा-
प्ने न संशयः अद्वयं च द्वयाभासं तथा जाग्रन्न सं-
शयः मनोदृश्यमिदं सर्वं यत्किंचित्सचराचरम्
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते अकल्प

वैत
च्योत्स
रथ
35

सर्वावबोधेनन संकल्पयेत्तदा अमनस्कोत
ह्रायतिग्राह्याभावेतत्रग्रहम कल्पकमयत्ना
नेत्रयोभिन्नेष्ववलोने अभ्यस्तेतयमयतिस्समनेना
नैविश्वपत्ते निरहंकारस्समनस्कोनिर्विकल्प
स्सयोमतः सर्वावाःसन्निविन्तयः स्वस्वप्रेस्वपना
स्समः लीयतेहि स्वस्वभेनतिरहंकारेननलीयतेत
हैवातिभयब्रह्मानालोकसमन्ततः अत्रस
निद्रस्सममनामकमरूपकम सर्वहिभात
सर्वेस्त्रोपचारःकथ्यचन सर्वाभिमानविस्म
तःसर्वचिन्तासमुत्थितः स्वप्रशान्तःसर्वरूपा
तिःसमाधिरचलाभयः ग्रहानतत्रनोत्सर्गोपि
नापगतविद्यते आत्मसंस्थितदहानमतानि
समनोगतम अपस्पर्शोयोगोनामदुर्दर्शःस

र्वयोगिभिः योगिनो बिभ्यति ह्यस्मादभये भया
दर्शिनः ३९ मनसो निग्रहायत्तमभयं सर्वयोगि
नां दुःखक्षयप्रबोधश्चाप्यक्षया शान्तिरेव च
उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना मनसो
निग्रहस्तद्वद्भवेदपरिखेदतः उपायेन निगृह्णी
याद्विक्षिप्तं कामभोगयोः सुप्रसन्नं लये चैव य
था कामो लयस्तथा दुःखं सर्वमनुस्मृत्य का
मभोगान्निवर्तयेत् अजं सर्वमनुस्मृत्य जातं नैवा
नुपश्यति लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः
सकषायं विजानीयात्समप्राप्तं न चालयेत्
नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् नि
श्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः यदा न
लीयते चित्तं न च विक्षिप्यते मनः अनिङ्गनमना

[illegible] 36

भासंनिष्पन्नंब्रह्मतत्तदा स्वस्थंशान्तंसनिर्वा
णमकथ्यंसुखमुत्तमम् अजमजेनज्ञेयेनसर्व
ज्ञंपरिचक्षते नकश्चिज्जायतेजीवः संभवो
स्यनविद्यते एतत्तदुत्तमंसत्यंयत्रकिंचिन्नजाय
तेयत्रकिंचिन्नजायते [illegible]
ख्यंप्रकरणंतृतीयम् ३ [illegible]
ते २४ ज्ञानेनाकाशकल्पेनधर्मान्योगगनो
पमान् ज्ञेयाभिन्नेनसंबुद्धस्तंवन्देद्विपदांवरं
अस्पर्शयोगोवैनामसर्वसत्वसुखोहितः अवि
वादोविरुद्धश्चदेशितस्तंनमाम्यहं भूतस्यजा
तिमिच्छन्तिवादिनःकेचिदेवहि अभूतस्यापरे
धीराविवदन्तःपरस्परम् भूतंनजायतेकिंचि
दभूतंनैवजायते विवदन्तोऽद्वयाह्येवमजातिंख्या

पयन्तिते ख्याप्यमानामजातिंतैरनुमोदामहे
वयम् विवदामोनतैःसार्धमविवादंनबोधो
नाप्रभुमःदोषः २ अजातस्यैवधर्मस्यजाति
मिच्छन्तिवादिनः अजातोह्यमृतोधर्मोम
र्त्यतांकथमेष्यति नभवत्यमृतंमर्त्यंनमर्त्य
ममृतंतथा प्रकृतेरन्यथाभावोनकथंचि
द्भविष्यति स्वभावेनामृतोयस्यधर्मोगच्छति
मर्त्यताम् कृतकेनामृतस्तस्यकथंस्थास्यति
निश्चलः २ सांसिद्धिकीस्वाभाविकीसहजा
अकृताचयाप्रकृतिःसेतिविज्ञेयास्वभावंन
जहातिया जरामरणनिर्मुक्ताःसर्वेधर्माःस्वभा
वतः जरामरणमिच्छन्तश्च्यवन्तेतन्मयाया
पि २ कारणंयस्यवैकार्यंकारणंतस्यजायते

मूला
नक्षा
मू २

37

मे जायमाने कथमजं नित्यं भिन्नं कथं च तत्
कारणाद्यद्यनन्यत्वमतः कार्यमजं यदि जा
यमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम अ
जाद्वै जायते यस्य दृष्टान्तस्तस्य नास्ति वै जा
ताच्च जायमानस्य न व्यवस्था प्रसज्यते हेतो
रादिः फलं येषामादिर्हेतुः फलस्य च हेतोः फ
लस्य चादिः कथं तैरुपवर्ण्यते हेतोरादिः फ
लं येषामादिर्हेतुः फलेन च तथा जन्म भ
वेत्तेषां पुत्राज्जन्म पितुर्यथा संभवे हेतुफलयो
रेषितव्यः क्रमस्त्वया युगपत्संभवे यस्माद
सम्बन्धो विषाणवत् फलादुत्पद्यमानः सन्न
ते हेतुः प्रसिध्यति अप्रसिद्धः कथं हेतुः फल
मुत्पादयिष्यति यदि हेतोः फलात्सिद्धिः फ

न सिद्धिर्हेतुतः । तेन सर्वेति च्छन्नेयमपि
द्विरूपत्वया ख्यापितं क्रियाविज्ञानं कर्मकोपणे
घवाशुनः । पवेद्दिसवेद्याबुद्धेरनात्मिपादी
पिता बीजांकुरानेकोदृष्टान्तः सदा सा ख्या
सिसाद्दिसः नवसाख्यस्मोहेतुः सिद्धौ साध्य
साधुन्यते ४ पूर्वोपगपारिज्ञानसज्ञानेः पारि
दीपकम् जायमानाद्धिकयमो क्रुकथ्यभ्रुवेनाट
ह्यते सतो वापरो नो वापि न किंचिदुत्कृजाय
ते सदसत्सदसद्वापि न किंचिदुत्कृजायते ।
हेतुर्न जायते नादेः फलं वापि स्वभावतः आ
दिर्न विद्यते यस्य तस्य ह्याद्यिर्न विद्यते ॥ पुनराह
सतो निमित्तं मिथ्यात्वे धुदिदर्शनात् निमित्तस्य
निमित्तत्वं मिथ्यात्वे भूतदर्शनात् ५ चित्तं न सं

प्रला
नश्रा
१८

२८

स्मरणानर्थेनार्थाभासेन तथैव : अथ नेन्द्रिय
जन्यार्थेनार्थाभासेन ततः पृथक् निमित्तेन
सदादिनेवितत्स्वरूपेन मायेन नस्वपरूपनि
रूपणानि विवेचनरूपणानेतेनपदम् अनातेनाय
नेयस्मादजातिः प्रकृतिसंस्था प्रकृतेसंस्था
भावाभावान कथं च विकल्पविच्छित्ति अनादेतान
वेदसमारस्यनेतत्स्याति अनन्ततनाकाहम
तोभोत्तस्यनुभावविच्छित्ति ६ आदावन्तेपित
तायिवर्तमानेपि तन्तेथा वितथः सदृशा।
सन्तोवितथाश्चवलाद्भिलाः सप्रयोजनतेनाने
पाद्यभावप्रतिपद्यते तस्मादाद्यन्तवैश्वतमि
थ्यावलितेस्मृताः सर्वेषमामन्त्रणासमेका
तस्मान्ततिदर्शनात सहेतेतस्मिन्नदर्शावश्च।

नाकेदर्शनेकृतः नचक्षुर्दर्शनेगताकाल
स्मातिदमाकृतेः प्रतिबुद्धश्चवेसवैस्तोस
नैषानविद्यते मियोग्यः सहसमत्रप्रभो
नप्रपद्यते गृहीतेवापिपात्किविप्रीतिबु
ज्ञानप्रणाति ७ स्वभावावस्तुकः कायः स्व
प्रयोगमयप्रदर्शनात यथाकाप्यस्तथया
वैचित्र्यप्रपमवस्तुकम ग्रहणात्मागोरि
नवत्तेवतः स्वयमुद्धते नवेत्तनाश्चनस्वभ
जागोतिमिच्छते उत्पादस्याग्नेहुत्वादा
नेसर्वेपुदाहृतम नवभूतोऽहबुद्धस्वभा
वोस्तिकश्चवन अमतागीतिदृष्टाविमप
ष्पत्तितस्मयाः अमत्वमेवदृष्टावप्रतिबु
ज्ञानप्रणाति नास्तिसङ्घकमसमटसेड

अला
तशा
३९
39

तुकं तथा सच्च सद्धेतुकं नास्ति सद्धेतुकमस
सत्कुतः ४० विपर्यासाद्यथा जाग्रदचिन्त्या
न्भूतवत्स्पृशेत् तथा स्वप्ने विपर्यासाद्धर्मा
स्तत्रैव पश्यति उपलम्भात्समाचारादस्ति
वस्तुत्ववादिनां जातिस्तु देशिता बुद्धैरजाते
स्त्रसतां सदा अजातेस्त्रसतां तेषामुपलम्भा
द्वियन्ति ये जातिदोषा न सेत्स्यन्ति दोषोऽप्यल्पो
भविष्यति उपलम्भात्समाचारान्मायाह
स्ती यथोच्यते उपलम्भात्समाचारादस्ति व
स्तु तथोच्यते जात्याभासं चलाभासं वस्त्वाभा
सं तथैव च अजाचलमवस्तुत्वं विज्ञा
नं शान्तमद्वयं ४५ एवं न जायते चित्तमेवं
धर्मा अजाः स्मृताः एवमेव विजानन्तो न

प्रतिविम्बये स्फुटवक्रापिकाभासमला
नस्पान्दितेनयथा अस्पन्दमानविज्ञानमना
भासमानेनयथा अलातेस्पन्दमानेनाभास
मानोभवः नतनोस्पर्शनिस्पन्दनालातच
विश्रान्तिने अनिर्गताग्रलातानेन इष्टवा
भावयोगतः विज्ञानेपिनिर्थवासनाभास
स्पाविश्राघ्रतः २ विज्ञानेस्पन्दमानेवेनाभ
मानुमनोभवः नतनोस्पर्शनिस्पन्दनाविज्ञ
नैर्थविश्रान्तिने नानिर्गताग्रेविज्ञानाइष्ट
नोभावयोगतः कार्यकारणतायोगादा
नैविज्ञानेस्पहेवहि इष्टष्टव्यस्पहेतस्पादस
दन्यस्पचेवहि इष्टतमनमभाभावोयमी
लानेनोपपद्यते एवंनविज्ञानायमोक्षित्वा

प्रता
नशा
५०

40

पिनयभिजन पर्वेहेन्नफलेनेनेतिप्रविशन्ति
मनीषिणः यावद्दर्शनफलावेशस्तावद्दर्शन
फलोद्भवः द्वौण्येतन्नफलावेशमस्तोनो
पपद्यते ११ महत्मानाधीनसहमशास्त्रनतेन
नास्तिवे यन्नीयपञ्चतिजायजेजायलेनतन
मनः जन्मसाध्यायमेनेषासासत्वसायानावि
द्येते यथामायामस्यार्द्रीजातायनेतन्मयो
करः नमनितेनानावच्छेदीनद्वेद्वेमद्भुयोगा
ना नाद्येषुसर्वेयभिद्भुशास्त्रतानास्तिथीयं
नः यद्बर्णानवर्तनेनाविवेकत्सत्ववेनाच्छेते
यथाग्रहमेडयाभासविजनवलतिमायथात
थानाग्रहयाभासविनेवलतिमायथा ११
अहंपदवद्याभासमनःस्वभेनसंशयः ॥

द्वयंचद्वयाभासंतथाजाग्रन्नसंशयः ॥ स्वप्नदृ
क्प्रचरन्स्वप्नेदिक्षुवैदशसुस्थितान अण्ड
जान्स्वेदजान्वापिजीवान्पश्यतियान्सदा स्व
प्नदृक्चित्तदृश्यास्तेनविद्यन्तेततःपृथक्ता
थातद्दृश्यमेवेदंस्वप्नदृक्चित्तदृश्यते चरञ्जा
गरितेजाग्रद्दिक्षुवैदशसुस्थितान अण्डजा
न्स्वेदजान्वापिजीवान्पश्यतियान्सदा ६६ जा
ग्रच्चित्तेक्षणीयास्तेनविद्यन्तेततःपृथक् त
थाद्दृश्यमिदंजाग्रच्चित्तमिष्यते उभेह्य
न्योन्यदृश्येतेकिंतदस्तीतिनोच्यते लक्षणा
शून्यमुभयंतन्मतेनैवगृह्यते यथास्वप्नमयो
जीवोजायतेम्रियतेपिच यथाजीवाअमीस
र्वेभवन्तिनभवन्तिच यथानिर्मितकोजीवो

अला
तशा
५८
५१

जायतेम्रियतेपिच यथाजीवाअमीसर्वेभवा
न्तिनभवन्तिच नकश्चिज्जायतेजीवः सम्भवो
ऽस्यनविद्यते एतत्तदुत्तमंसत्यंयत्रकिंचिन्न
जायते चित्तस्पन्दितमेवेदंग्राह्यग्राह
कवद्द्वयं चित्तंनिर्विषयंनित्यमसंगंतेनकी
र्तितम् ७२ योस्तिकल्पितसंवृत्त्या परमार्थे
ननास्त्यसौ परतन्त्राभिसंवृत्त्या स्यान्नास्ति परमार्थतः ।
अजःकल्पितसंवृत्त्या परमार्थेननाप्यजः प
रतन्त्राभिनिष्पत्त्या संवृत्त्याजायतेतुसः अभू
ताभिनिवेशोस्ति द्वयंतत्रनविद्यते द्वयाभावं स
बुद्ध्वैव निर्निमित्तोनजायते यदानलभतेहे
तूनुत्तमाधममध्यमान् तदानजायतेचित्तंहे
त्वभावेफलंकुतः अनिमित्तस्यचित्तस्यया

रतिः समाड्या अज्ञानस्यैव सर्वविस्य चिन्तेदृश्यं
हितस्यतः व्रु-- निर्मितेनो समैपा हेतुयथागा
तिभुवन वीतशोकेन तथा कामिमभयपदमा
श्नुते अभूतामिनिवष्यद्भिः सदृशात्तस्य वर्त्तते व
स्वभावेसत्रुद्धेवनिः संगोनानिवर्तते निहत्स्य
प्रवृत्तेस्यनिश्चलाहितदास्थिति विप्रयः सक्तो
बुद्धानान्तत्साम्यमज्ञमडयम अजमस्तिद्दमस
म्प्रभावभवतिस्वयम सक्त्त्दि भातीत्येवेमुप
मिषीतेस्वभावतः स्वविमाश्रयनेनिसङ्गः विवि
क्षिपतेसदा यस्यपमीस्यग्रहणंभगवान्वेपिम
श्नुते अस्तिनास्यस्तिनास्तीतिनास्तिनास्तीति
वाम्बुनः चरस्थिरो भयाभीसिग्रहणेनेवबालि
शः कोलास्थतत्त्वपताश्चग्रहेणैसामसदाहतः

भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् प्राप्य
सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयम् अनाप
न्नादिमध्यान्तं किमतः परमीहते विप्राणां वि
नयो ह्येष शमः प्राकृत उच्यते दमः प्रकृतिदान्त
त्वादेवं विद्वाञ्छमं व्रजेत् सवस्तु सोपलम्भं च द्व
यं लौकिकमिष्यते २६ अवस्त्वनुपलम्भं चा
लोकोत्तरमिति स्मृतम् ज्ञानं ज्ञेयं च विज्ञेयं स
दा बुद्धैः प्रकीर्तितम् ज्ञाने च त्रिविधे ज्ञेये क्रमे
ण विदिते स्वयम् सर्वज्ञता हि सर्वत्र भवतीह म
हाधियः हेयज्ञेयाप्यपाक्यानि विज्ञेयान्यग्र
याणतः तेषामन्यत्र विज्ञेयादुपलम्भस्त्रिषु स्मृ
तः प्रकृत्याकाश‥ विज्ञेयाः सर्वे धर्मा अनादयः
विद्यते न हि नानात्वं तेषां क्वचन किंचन आदि

बुद्धाः प्रकृत्यैव सर्वधर्मा स्वनिश्रिताः यस्यैवं भा-
वितत्वान्निसोऽस्तनायकल्पते २८ [illegible]
ता ह्यनुत्पन्नाः प्रकृत्यैव स्वनिर्वृताः सर्वधर्मा-
मेषु समाभिवाञ्छ प्रज्ञेषु गुणेषु विशारदे वैशारद्येन
नास्ति व भेदो विद्यते नाम सदा भेदवादाः पृथग्या
दानस्मात्रैकपणाः स्मृताः प्रज्ञेसामान्त्वयैके
विह्नविछिन्नान् विपश्यतः नैहिलोके सह्वाल्पान्
लन्हलोके न गाहते प्रज्ञेनुज्जन्मसंज्ञात्वधर्मा-
ष्वज्ञातेनाभिषज्यते यत्रान्तक्रमेन ज्ञानसमागतेन की
र्तितम् प्रज्ञसमाधिविवर्धज्ञायमानो विपश्यतः
प्रसंगतामसदानातिलिकिञ्चिदावरणच्युतिः २८
प्रलब्धावरणाः सर्वधर्माः प्रकृतिनिर्मलाः प्र-
हेयबुद्धानस्थाप्रकृत्याबुध्यन्ते जिननायिकाः प्र

आता
नशा
५२
113

मेतेन हि बुद्ध स्मृत्वाने ये मे बुने मामनः मर्वेषमीम
ष्यात्वानेनेतद्वुद्धेन भाषितम उर्दशीपतिगम्भी
रमनेषणमविशारदम बुद्धामनानानेमनः
कर्मीयष्याबलेमनः कर्मीयष्याबले उपदेश
प्रकेलानशान्ताविप्रकारणञ्चनर्थसमाप्तं ४
पञ्चदशीयपशुपतिमत ८५ अपशुपत्वावरोह
तीदिवितः शीघ्रवीमयम अपशुपमुवनत्ह
नीलग्रीवे शितिबाहुनम द्विवग्राग्नावाहृत
स्नस्वाडमामामीय ननामः पशुपतमहत्नीलग्री
